श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

अथर्वणवेदे मन्त्रखण्डे पूर्वसंहितायां

# ॥ श्री हयग्रीवकवचम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हयग्रीवकवचम् ॥

अस्य श्रीहयग्रीवकवचमहामन्त्रस्य हयग्रीव ऋषिः।
अनुष्टुप्छन्दः।
श्री हयग्रीवः परमात्मा देवता।
ओं श्रीं वागीश्वराय नम इति बीजम्।
ओं क्लीं विद्याधराय नम इति शक्तिः।
ओं सौं वेदनिधये नम इति कीलकम्।
ओं नमो हयग्रीवाय शुक्लवर्णाय विद्यामूर्तये
ओंकारायाच्युताय ब्रह्मविद्याप्रदाय स्वाहा।
मम हयग्रीवप्रसादसिद्ध्यर्थे जपे विनियोगः॥

## ध्यानम्

कलशाम्बुधिसङ्काशं कमलायतलोचनम्।
कलानिधिकृतावासं कर्णिकान्तरवासिनम्॥ 1 ॥

ज्ञानमुद्राक्षवलयशङ्खचक्र लसत्करम्।
भूषाकिरण सन्दोह विराजितदिगन्तरम्॥ 2 ॥

वक्त्राब्ज निर्गतोद्दामवाणी सन्तानशोभितम्।
देवतासार्वभौमं तं ध्यायेदिष्टार्थसिद्धये॥ 3 ॥

ओं
हयग्रीवः शिरः पातु ललाटं चन्द्रमध्यगः।
शास्त्रदृष्टिर्दृशौ पातु शब्द ब्रह्मात्मकः श्रुती॥ 1 ॥

घ्राणं गन्धात्मकः पातु वदनं यज्ञसंभवः।
जिह्वां वागीश्वरः पातु मुकुन्दो दन्तसंहतीः॥ 2 ॥

ओष्ठं ब्रह्मात्मकः पातु पातु नारायणोऽधरम्।
शिवात्मा चिबुकं पातु कपोलौ कमलाप्रभुः॥ 3 ॥

विद्यात्मा पीठकं पातु कण्ठं नादात्मको मम।
भुजौ चतुर्भुजः पातु करौ दैत्येन्द्रमर्दनः॥ 4 ॥

ज्ञानात्मा हृदयं पातु विश्वात्मा तु कुचद्वयम्।
मध्यमं पातु सर्वात्मा पातु पीताम्बरः कटिम्॥ 5 ॥

कुक्षिं कुक्षिस्थविश्वो मे बलिभङ्गो वलित्रयम्।
नाभिं मे पद्मनाभोऽव्याद् गुह्यं गुह्यार्थबोधकृत्॥ 6 ॥

ऊरू दामोदरः पातु जानुनी मधुसूदनः।
पातु जङ्घे महाविष्णुर्गुल्फौ पातु जनार्दनः॥ 7 ॥

पादौ त्रिविक्रमः पातु पातु पादाङ्गुळीर्हरिः।
सर्वाङ्गं सर्वगः पातु पातु रोमाणि केशवः॥ 8 ॥

धातून्नाडीगतः पातु भार्यां लक्ष्मीपतिर्मम।
पुत्रान् विश्वकुटुम्बी मे पातु बन्धून् सुरेश्वरः॥ 9 ॥

मित्र मित्रात्मकः पातु वह्न्यात्मा शत्रुसंहतीः।
प्राणान् वाय्वात्मकः पातु क्षेत्रं विश्वम्भरात्मकः॥ 10 ॥

वरुणात्मा रसान् पातु व्योमात्मा हृद्गुहान्तरम्।
दिवारात्रं हृषीकेशः पातु सर्वं जगद्गुरुः॥ 11 ॥

विषमे सङ्कटे चैव पातु क्षेमङ्करो हरिः (मम)।
सच्चिदानन्दरूपो मे ज्ञानं रक्षतु सर्वदा॥ 12 ॥

प्राच्यां रक्षतु सर्वात्मा आग्नय्यां ज्ञानदीपकः।
याम्यां बोधप्रदः पातु नैर्ऋत्यां चिद्घनप्रभः॥ **13** ॥

विद्यानिधिस्तु वारुण्यां वायव्यां चिन्मयोऽवतु।
कौबेर्यां वित्तदः पातु ऐशान्यां च जगद्गुरुः॥ **14** ॥

ऊर्ध्वं पातु जगत्स्वामी पात्वधस्तात् परात्परः।
रक्षाहीनं तु यत् स्थानं रक्षत्वखिलनायकः॥ **15** ॥

एवं न्यस्तशरीरोऽसौ साक्षाद्वागीश्वरो भवेत्।
आयुरारोग्यमैश्वर्यं सर्वशास्त्रप्रवक्तृताम्॥ **16** ॥

लभते नात्र सन्देहो हयग्रीवप्रसादतः।
इतीदं कीर्तितं दिव्यं कवचं देवपूजितम्॥ **17** ॥

॥ इति श्री हयग्रीवकवचं समाप्तम्॥